श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ नवमस्कन्धे पञ्चमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ नवमस्कन्धे पञ्चमोऽध्यायः ॥

श्रीशुक उवाच
एवं भगवताऽऽदिष्टो दुर्वासाश्चक्रतापितः।
अम्बरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥ **1** ॥

तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः।
अस्तावीत् तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥ **2** ॥

अम्बरीष उवाच
त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च ॥ **3** ॥

सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय।
सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥ **4** ॥

त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक्।
त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥ **5** ॥

नमः सुनाभाखिलधर्मसेतवे
    ह्यधर्मशीलासुरधूमकेतवे।
त्रैलोक्यगोपाय विशुद्धवर्चसे
    मनोजवायाद्भुतकर्मणे गृणे ॥ **6** ॥

त्वत्तेजसा धर्ममयेन संहृतं
    तमः प्रकाशश्च धृतो महात्मनाम्।
दुरत्ययस्ते महिमा गिरां पते
    त्वद्रूपमेतत् सदसत् परावरम्॥ 7 ॥

यदा विसृष्टस्त्वमनञ्जनेन वै
    बलं प्रविष्टोऽजित दैत्यदानवम्।
बाहूदरोर्वङ्घ्रिशिरोधराणि
    वृक्णन्नजस्रं प्रधने विराजसे॥ 8 ॥

स त्वं जगत्त्राण खलप्रहाणये
    निरूपितः सर्वसहो गदाभृता।
विप्रस्य चास्मत्कुलदैवहेतवे
    विधेहि भद्रं तदनुग्रहो हि नः॥ 9 ॥

यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः।
कुलं नो विप्रदैवं चेद् द्विजो भवतु विज्वरः॥ 10 ॥

यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः।
सर्वभूतात्मभावेन द्विजो भवतु विज्वरः॥ 11 ॥

श्रीशुक उवाच
इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम्।
अशाम्यत् सर्वतो विप्रं प्रदहद् राजयाच्ञया॥ 12 ॥

स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः।
प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः॥ 13 ॥

दुर्वासा उवाच
अहो अनन्तदासानां महत्त्वं दृष्टमद्य मे।
कृतागसोऽपि यद् राजन् मङ्गलानि समीहसे॥ **14** ॥

दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम्।
यैः सङ्गृहीतो भगवान् सात्वतामृषभो हरिः॥ **15** ॥

यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः।
तस्य तीर्थपदः किं वा दासानामवशिष्यते॥ **16** ॥

राजन्ननुगृहीतोऽहं त्वयातिकरुणात्मना।
मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः॥ **17** ॥

राजा तमकृताहारः प्रत्यागमनकाङ्क्षया।
चरणावुपसङ्गृह्य प्रसाद्य समभोजयत्॥ **18** ॥

सोऽशित्वाऽऽदृतमानीतमातिथ्यं सार्वकामिकम्।
तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम्॥ **19** ॥

प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै।
दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा॥ **20** ॥

कर्मावदातमेतत् ते गायन्ति स्वःस्त्रियो मुहुः।
कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम्॥ **21** ॥

श्रीशुक उवाच
एवं सङ्कीर्त्य राजानं दुर्वासाः परितोषितः।
ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोकमहैतुकम्॥ **22** ॥

संवत्सरोऽत्यगात् तावद् यावता नागतो गतः।
मुनिस्तद्दर्शनाकाङ्क्षो राजाऽब्भक्षो बभूव ह॥ **23** ॥

गते च दुर्वाससि सोऽम्बरीषो
    द्विजोपयोगातिपवित्रमाहरत्।
ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा
    मेने स्ववीर्यं च परानुभावम्॥ **24**॥

एवंविधानेकगुणः स राजा
    परात्मनि ब्रह्मणि वासुदेवे।
क्रियाकलापैः समुवाह भक्तिं
    ययाऽऽविरिञ्च्यान् निरयांश्चकार॥ **25**॥

अथाम्बरीषस्तनयेषु राज्यं
    समानशीलेषु विसृज्य धीरः।
वनं विवेशात्मनि वासुदेवे
    मनो दधद् ध्वस्तगुणप्रवाहः॥ **26**॥

इत्येतत् पुण्यमाख्यानमम्बरीषस्य भूपतेः।
सङ्कीर्तयन्ननुध्यायन् भक्तो भगवतो भवेत्॥ **27**॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
नवमस्कन्धे अम्बरीषचरितं नाम पञ्चमोऽध्यायः॥